# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - आचार्य-१, सेमेस्टर-१ | प्रश्नपत्रम् - ४ | गुणाः - ७० |
| विषयः - पुराणेतिहासः | कोड - CC-4.1.3 | समयः - ०३-०६ |
| दिनाङ्कः - ८.१२.२०१६ | ग्रन्थः - श्रीमद्भागवते दशमस्कन्धः ( पूर्वार्धः ) | |

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ एकस्य पद्यस्य ससन्दर्भं व्याख्यानं कुरुत । ०४**

(१) *अवतीर्य यदोर्वंशे भगवान् भूतभावनः ।*
*कृतवान् यानि विश्वात्मा तानि नो वद विस्तरात् ॥*

(२) *नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः ।*
*यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥*

**प्रश्नः २ कस्यचिदेकस्य विस्तरेण वर्णनं कुरुत । १२**

*१. भगवतः श्रीकृष्णस्य नामकरणसंस्कारः ।*
*२. पूतनावधः ।*
*३. ब्रह्मणो मोहभङ्गः ।*

**प्रश्नः ३ कयोश्चित् द्वयोः लघूत्तरे यच्छत । ०४**

*(१) बलरामस्य त्रीणि नामानि लिखत ?*
*(२) भगवता कयोः द्वयोः वृक्षयोः उद्धारः कृतः ?*
*(३) भगवतः कृष्णस्य पालकपितरौ कौ ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ४ कस्यचिदेकस्य पद्यस्य व्याख्यानं कुरुत । ०४**

(१) *कालिन्द्यां कालियस्यासीद्ध्रदः कश्चिद् विषाग्निना ।*
*श्रप्यमाणपया यस्मिन् पतन्त्युपरिणाः खगाः ॥*

(२) *कर्मणा जायते जन्तुः कर्मणैव विलीयते ।*
*सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥*

**प्रश्नः ५ टिप्पणीद्वयं लिखत । ०८**

*१. ब्रह्मणा कृता कृष्णस्तुतिः* *२. कालियमोक्षः*
*३. धेनुकवधः* *४. प्रलम्बवधः*

**प्रश्नः ६ त्रयाणामुत्तराणि एकवाक्येन यच्छत । ०३**

*(१) विणुगीतं दशमस्कन्धस्य कस्मिन् अध्याये अस्ति ?*
*(२) श्रीकृष्णस्य मित्राणां नामानि लिखत ?*
*(३) हेमन्ते प्रथमे कस्याः देव्याः व्रतं कृतवन्तः ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ७ कस्यचिदेकस्य श्लोकस्य व्याख्यानं कुरुत** ०४

(१) *विशुद्धसत्वं तव धाम शान्तं*
*तपोमयं ध्वस्तरजस्तमस्कम् ।*
*मायामयोऽयं गुणसम्प्रवाहो*
*न विद्यते तेऽग्रहणानुबन्धः ॥*

(२) *तव कथामृतं तप्तजीवनं*
*कविभिरीडितं कल्मषापहम् ।*
*श्रवणमङ्गलं श्रीमदाततं*
*भुवि गृणन्ति ते भूरिदा जनाः ॥*

**प्रश्नः ८ काञ्चिद् एकां टिप्पणीं यच्छत ।** ०७

*१. विश्वस्याद्वितीयः विरहगीतं गोपीगीतम् ।*
*२. अक्रूरस्य पात्रालेखनम् ।*

**प्रश्नः ९ कयोश्चिद् द्वयोः उत्तरे यच्छत ।** ०४

*(१) गोपीगीतं कस्मिन् अध्याये ? कति श्लोकाः ?*
*(२) गोपीशब्दस्य प्रथमाविभक्तिं लिखत ?*
*(३) युगलगीतं कस्मिन् अध्याये ? तत्र कति श्लोकाः ?*

## चतुर्थान्वितिः ( युनिट - ४ )

**प्रश्नः १० पद्यद्वयस्य व्याख्यानं कुरुत ।** ०८

(१) *अक्रूरोऽपि च तां रात्रिं मधुपूर्यां महामतिः ।*
*उषित्वा रथमास्थाय प्रययौ नन्दगोकुलम् ॥*

(२) *एवं ब्रुवाणा विरहातुरा भृशं*
*व्रजस्त्रियः कृष्णविषक्तमानसाः ।*
*विसृज्य लज्जां रुरुदुः स्म सुस्वरं*
*गोविन्द दामोदर माधवेति ॥*

(३) *मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्*
*गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।*
*मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां*
*वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥*

**प्रश्नः ११ टिप्पणीद्वयं लिखत ।** ०८

*१. कुवलयापीडवधः ।* *२. भ्रमरगीतम् ।*
*३. कंसवधः ।* *४. कुब्जायामनुग्रहः ।*

**प्रश्नः १२ नातिविस्तरेण लिखत ।( चतुर्णाम् )** ०४

*(१) दशमस्कन्धे कति अध्यायाः ?*
*(२) पूर्वार्धे कति अध्यायाः ?*
*(३) श्रीमद्भागवते कति श्लोकाः ?*
*(४) दशमस्कन्धः श्रीकृष्णस्य किमङ्गम् ?*
*(५) कुत्र सन्निहितो हरिः ?*

=०=